(631) "ज्वर रोगे" (I-भ्वादिः-776. अक. सेट्. पर. घटादिः ।)

[1]ज्वारकः-रिका, [2]ज्वरकः-रिका, जिज्वरिषकः-षिका, [3]जाज्वरकः-रिका ;
ज्वरिता-त्री, ज्वरयिता-त्री, जिज्वरिषिता-त्री, जाज्वरिता-त्री ;
ज्वरन्-न्ती, [A]संज्वरन्ती, ज्वरयन्-न्ती, जिज्वरिषन्-न्ती ; —
ज्वरिष्यन्-न्ती-ती, ज्वरयिष्यन्-न्ती-ती, जिज्वरिषिष्यन्-न्ती-ती ; —
— ज्वरयमाणः, — जाज्वर्यमाणः ;
— ज्वरयिष्यमाणः, — जाज्वरिष्यमाणः ;
[4]जूः-जूरौ-जूरः ; — — —
ज्वरितम्-तः-तवान्, ज्वरितः, जिज्वरिषितः, जाज्वरितः-तवान् ;
[B]ज्वरः, [5]सञ्ज्वारी,[C] ज्वरः, जिज्वरिषुः, जाज्वरः ;
ज्वरितव्यम्, ज्वरयितव्यम्, जिज्वरिषितव्यम्, जाज्वरितव्यम् ;
ज्वरणीयम्, ज्वरणीयम्, जिज्वरिषणीयम्, जाज्वरणीयम् ;
ज्वार्यम्, ज्वर्यम्, जिज्वरिष्यम्, जाज्वर्यम् ;
ईषज्ज्वरः-दुर्ज्वरः-सुज्वरः ; — —
ज्वर्यमाणः, ज्वर्यमाणः, जिज्वरिष्यमाणः, जाज्वर्यमाणः ;
ज्वारः, ज्वरः, जिज्वरिषः, जाज्वरः ;
ज्वरितुम्, ज्वरयितुम्, जिज्वरिषितुम्, जाज्वरितुम् ;

---

1. 'अत उपधायाः' (7-2-116) इत्युपधाकारस्य वृद्धिः । एवं ण्यदादिषु ज्ञेयम् ।
2. अस्य धातोः घटादिपाठेन मित्त्वात्, णौ परतः उपधावृद्धौ सत्याम्, 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वो भवति । एवं ण्यन्ते सर्वत्र ज्ञेयम् ।
3. यङि द्वित्वादिके कृते, अभ्यासे, 'दीर्घोऽकितः' (7-4-83) इति दीर्घः । एवं यङन्ते सर्वत्र ज्ञेयम् ।
4. 'ज्वरत्वरस्रिव्यविमवामुपधायाश्च' (6-4-20) इति, उपधावकारयोर्ऊठौ । अनन्तरं सवर्णदीर्घः । 'खरवसानयोः—' (8-3-15) इति विसर्गः । जूः = पिशाचः ।
5. 'सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वर—' (3-2-142) इत्यादिना तच्छीलादिषु कर्तृषु घिनुण्प्रत्ययो भवति । उपधावृद्धिः ।

A. 'ताः संज्वरन्तीर्गलदश्रुधारा विमोहशक्त्या ह्रियन् वियोगः ।' धा. का. 2.6.
B. 'स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति ॥' शिशुपालवधे 2.54.
C. 'संज्वारिणेव मनसा ध्वान्तमायासिना मया ।' भ. का. 7.6.